**दिनाङ्कः 26.03.2026**

**प्रात: - 06:55**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**अथ वार्ताः**

-

**केन्द्रीय-मन्त्रिमण्डलम्**

केन्द्रीय-मन्त्रिमण्डलेन आगामिदशवर्षेभ्य: चत्वारिंशदधिक-अष्टशतोत्तर-अष्टाविंशति-सहस्रकोटि-रूप्याकाणां व्ययेन 'संशोधित-उड़ान' इति क्षेत्रीय-सम्पर्कयोजनाया: विस्तार: स्वीकृताः। अस्य निर्णयस्य विषये वार्ताहारान्-संसूचयन् सूचनाप्रसारणमन्त्री अश्विनी वैष्णव: उक्तवान् यत् क्षेत्रीयसम्पर्कं संवर्धयितुं विद्यमान-अविमानपत्तनेभ्य: शतनूतनानि विमानपत्तनानि विकसितानि भविष्यन्ति इति। **बाइट-अवश्विनी वैष्णव**

**सर्वदलीयोपवेशनम्**

प्रशासनेन ह्य: सांय नवदिल्ल्यां संसद्भवनपरिसरे पश्चिमैशियाया: स्थितौ सर्वदलीयोपवेशनम् आहूतम्। उपवेशनस्य अध्यक्षतां रक्षामन्त्री राजनाथसिंह: कृतवान्, यस्मिन् गृहमन्त्री अमितशाहः, विदेशमन्त्री एस्.जयशङ्करः, पेट्रोलियममन्त्री हरदीपपुरी, संसदीयकार्यमन्त्री किरेन् रिजिजू, जेडीयू इति दलस्य कार्यकार्यध्यक्ष: सञ्जयझा, राजीव-रञ्जन-सिंहः, अन्यनेतार: च सम्मिलिता: जाता:। उपवेशनानन्तरं वार्ताहरान् सम्बोधयन् श्री रिजिजू भागग्रहीतृभ्य: सर्वेषां दलानां सदस्येभ्य: धन्यवादं प्रदत्तवान्, उक्तवान् च यत् विपक्षनेतृभि: उत्थापिता: सर्वे प्रश्नाः सर्वाः चिन्ता: च प्रशासनेन सम्बोधिता: इति।

**पश्चिमैशिया**

प्रशासनेन उक्तं यत् देशे षड्विंशति-कोटि-टनमितस्य अशोधिततैलस्य शोधनक्षमता अस्ति इति, अतः नागरिकाः किंवदन्तीषु विश्वास: या कुर्वन्तु, भयेन क्रयणं मा कुर्वन्तु इति। एतद् वक्तव्यं पेट्रोलियम-प्राकृतिक-वातेन्धन-मन्त्रालयस्य संयुक्तसचिवपदासीना सुजाता शर्मा ह्य: पश्चिमैशियायां सद्यः एव जातेषु घटनाक्रमेषु आधारितस्य एकस्य अन्त:मन्त्रालयीय-विवरणस्य सम्बोधने प्रदत्तवती। पत्तनपोत-परिवहन-जलमार्ग-मन्त्रालयस्य विशेषसचिव: राजेशकुमार-सिन्हा उक्तवान् यत् गतासु चतुर्विंशति-होरासु पञ्चाशत्-भारतीय-नाविका: भारतं प्रति अनीताः।

**विधानसभा-निर्वाचन**

केरलम् राज्ये विधानसभानिर्वाचनेभ्य: नामाङ्कनं प्रत्यावर्तनस्य अन्तिम: दिवस: अद्य अस्ति:। एतन्मध्ये मङ्गलवासरे नामाङ्कनस्य निरीक्षणं सम्पूर्णानन्तरम् असम-विधानसभा-निर्वाचनेभ्य: अभियानं तीव्रीभूतम्। पुडुचेरी-केन्द्रशासितप्रदेशे नैर्वाचनिकप्रचार: तीव्रीभूत: अथ च प्रमुखनेतार: सर्वेषु निर्वाचनक्षेत्रेषु प्रचारभियानं तीव्रं कृतवन्त:।

**भाजपा-प्रत्याशी**

भाजपादलेन पश्चिमबङ्गाल-विधानसभानिर्वाचनेभ्यः नवविंशति-प्रत्याशिनाम् एका सूची प्रख्यापिता। अवधेयास्पदं वर्तते यत् आरजीकर चिकित्सामहाविद्यालय-चिकित्सालयप्रकरणे पीडितायाः माता रत्ना देबनाथः पानिहाटी-विधानसभाक्षेत्रात् नैर्वाचनिक-क्रीडाङ्गणे अस्ति। नवसूच्यनुसारं रथीन्द्रनाथबोसः कूचबिहारदक्षिण-विधानसभाक्षेत्रात् डॉ. शङ्कर गुच्छैत् मेदिनीपुरात् बिप्लव-मण्डलः हावड़ा-मध्यविधानसभा-क्षेत्रात् नैर्वाचनिक-क्रीडाङ्गणे उपस्थिताः सन्ति।

**रामनवमी**

राष्ट्रपतिपदासीना द्रौपदी मुर्मु: रामनवम्याः अवसरे नागरिकेभ्य: शुभकामना: प्रदत्तवती। एकस्मिन् सन्देशे एषा उक्तवती यत् भगवतः श्रीरामस्य जीवनयात्रा अस्मान् सार्थकजीवनस्य कृते सत्य-न्याय-पुण्यमार्गेभ्य: प्रेरयति इति।

**।। इति वार्ता:।।**